This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. m133 विषय स्तोत्र
नाव. शिव सहस्रनाम स्तोत्र
लेखक/लिपीकार —
पृष्ठ 7 काळ — पूर्ण/अपूर्ण

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

45

27

॥ शिवसां बू ॥

अथ वेदसारशिवसहस्रनामस्तोत्रं संपूर्णं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेश्वरंस्कंदं सांबंसद्गुरुमेवच। वेदसारसहस्राख्याख्या संप्रविरच्यते

त्रि०स० ॐनमः शिवेजयति॥ॐ ऐश्वर्यंपरमंतत्वमादिमध्यांतवर्जितं॥ आधारंसर्वभूताना
॥१॥ मनाधारमविक्रियं॥१॥अनंतानंतबोधांबुनिधिमद्भुतविक्रमं॥ अंबिकापति
मीशानमनीशंप्रणमाम्यहं॥२॥ एकमाद्यंतनिर्मुक्तं भक्तिशोभनमादरात्॥ न
मामिविग्रहं सांबंसंसारामयभेषजं॥३॥ महदादिविशेषांतंजगद्यस्याः
मं० समुत्थितं॥ यस्यामेवलयंयातिवंदेतामंबिकामहं॥४॥ गुरुमूर्तिधरांगुह्यां
गुह्यविज्ञानदायिनीं॥गुह्यभक्तजनश्रीतांगुह्यार्यांनिहितांनमः॥५॥ श्रीव्या
सउवाच॥ एकदामुनयःसर्वेद्वारकांद्रष्टुमागताः॥ वासुदेवंचसोत्कंठाः ॥श्रीः॥
कृष्णदर्शनलालसाः॥६॥ ततःसभगवान्श्रीतः पूजांचक्रेयथाविधि॥ ते
षामाशीस्ततोगृह्यबहुमानपुरःसरं॥७॥ तेषुदृष्टःसंस्थितेषुयामासकौमारप्रभ ॥१॥

प१

प२

वंचयन्॥ चरितंभूमिभारघ्नंलोकानंदकरंपरं॥८॥मार्कंडेयमुखाःसर्वेमा
ध्याह्निकक्रियोचिताः॥ कृष्णःस्नानमथोचक्रेमरुद्दक्षनकुरूरगादिभिः॥९॥पी
तांबरंत्रिपुंड्रंच धृत्वारुद्राक्षमालिकाः॥ सूर्योपस्थानंसंध्यांचस्मृतिधर्ममनुस्म
रन्॥१०॥शिवपूजांततः कृष्णोगंधपुष्पाक्षतादिभिः॥ चकारविधिवद्भक्त्या
२ नमस्कृत्यपुनःशुभां॥११॥ जयशंकरसोमेशरक्षरक्षेतिचाब्रवीत्॥ जज्ञा
पशिवसाहस्रंभुक्तिमुक्तिप्रदंविभो॥१२॥ अनन्यमानसःशांतःपद्मासन
गतःशुचिः॥ ततस्तेविस्मयापन्नादृष्ट्वाकृष्णविचेष्टितं॥१३॥ मार्कंडे
योवदत्कृष्णंबहुशोमुनिसंमतं॥ मार्कंडेयउवाच॥ त्वंविष्णुःकमलाकां
तःपरमात्माजगद्गुरुः॥१४॥ भवत्पूज्यःकथंशंभुरेतत्सर्वंवदस्वमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते र स्य

त्रि०स० व्यासउवाच ॥ अथमुनयःसर्वेमार्कंडेयंसमर्च्य ॥ १५ ॥ वचोभिर्वासुदेवश्च पप्रच्छसा
धुत्वयेतिच ॥ श्रीकृष्णउवाच ॥ साधुसाधुमुनेपृष्टंहितायसकलस्यच ॥ १६ ॥ अ
॥ २ ॥ ज्ञानंतवनास्त्येवतथापिचवदाम्यहं ॥ दैवतंसर्वदेवानांसर्वकारणकारणं ॥ १७ ॥
ज्योतिर्यत्परमानंदंसावधानमतिःशृणु ॥ विश्वसाधनमीशानंगुणातीतमजंपरं
॥ १८ ॥ जगतस्तस्थुषोह्यात्मामममूलंमहामुने ॥ योदेवःसर्वदेवानांध्येयःपू
ज्यःसदाशिवः ॥ १९ ॥ सशिवःसमहादेवःशंकरश्चनिरंजनः ॥ तस्मान्नान्यः
परोदेवस्त्रिषुलोकेषुविद्यते ॥ २० ॥ सर्वज्ञःसर्वगःशक्तःसर्वात्मासर्वतोमुखः
॥ पश्यंतेसर्वसिद्धांतैर्वेदांतैर्योमुनीश्वरः ॥ २१ ॥ तस्मिन्भक्तिर्महादेवेममधा शिवः
तुश्चनिर्मला ॥ महेशःपरमंब्रह्मशांतःसूक्ष्मःपरात्परः ॥ २२ ॥ सर्वांतरःसर्व ॥ २ ॥

साक्षीचिन्मयस्तमसःपरः ॥ निर्विकल्पोनिराभासोनिःसंगोनिरुपद्रवः ॥ २३ ॥ निर्ले
पःसकलाध्यक्षोमहापुरुषईश्वरः ॥ तस्यचेच्छाभवत्पूर्वंजगत्सृष्ट्यंतकारिणी ॥ २४ ॥
वामांगादभवंतस्यसोहंविष्णुरितिस्मृतः ॥ जनयामासधातारंदक्षिणांगात्सदा
रु शिवः ॥ २५ ॥ मध्यतोद्रमीशानंकालात्मापरमेश्वरः ॥ तपःकुर्वंतुभोव
त्साअब्रवीदितितान्शिवः ॥ २६ ॥ ततस्तेशिवमात्मानंप्रोचुःसंयतमानसाः
स्तुत्वातुविविधैस्तोत्रैःप्रणम्यचपुनःपुनः ॥ २७ ॥ ब्रह्मविष्णुमहेश्वराऊ
चुः ॥ तपःकेनप्रकारेणकर्तव्यंपरमेश्वर ॥ ब्रूहिसर्वमशेषेणस्वात्मानंवे
त्सिनापरः ॥ २८ ॥ श्रीमहादेवउवाच ॥ कायेनमनसावाचाध्यानपूजा
जपादिभिः ॥ कामक्रोधादिरहितंतपःकुर्वंतुभोसुराः ॥ २९ ॥ देवाऊचुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शि० स० त्वयायत्कथितं शंभो दुर्ज्ञेयमजितात्मभिः॥ सौम्योपायमतो ब्रह्मन्वद कारुण्यवारि
धे॥ ३०॥ श्रीशंकर उवाच॥ शृणुध्वं सर्वपापघ्नं भुक्तिमुक्तिप्रदं नृणां॥ सह
॥ ३ ॥ स्रनामसद्दिव्यं जप्तं मम सुव्रताः॥ ३१॥ यया संसारमग्नानां मुक्तिर्भव
ति शाश्वती॥ श्रण्वंतु तद्विधानं हि महापातकनाशनं॥ ३२॥ पठतां [illegible] राम
श्रण्वतां सद्यो मुक्तिः स्यादनपायिनी॥ ब्रह्मचारी कृतस्नानः शुक्लवासा जितें
द्रियः॥ ३३॥ भस्मधारी मुनिर्मौनी पद्मासनसमान्वितः॥ ध्यात्वा मां सकलाधी
शं निराकारं निरीश्वरं॥ ३४॥ पार्वतीसहितं शंभुं जटामुकुटमंडितं॥ दधानं
चर्म वैयाघ्रं चंद्रार्धकृतशेखरं॥ ३५॥ त्र्यंबकं वृषभारूढं कृत्तिवाससमु श्रीः
ज्वलं॥ सुरार्चितपदद्वंद्वं दिव्यभोगं सुसुंदरं॥ ३६॥ बिभ्राणं सुप्रसन्नं
॥ ३ ॥
च कुठारवराभयान्॥

दुर्दर्शं कमलासीनं नागयज्ञोपवीतिनं॥ ३७॥ विश्वकायं चिदानंदं शुद्धमक्ष
रमव्ययं॥ सहस्रशिरसं शश्चमनंतकरसंयुतं॥ ३८॥ सहस्रचरणं दिव्यं सोम
सूर्याग्निलोचनं॥ जगद्योनिमजं ब्रह्मशिवमाद्यं सनातनं॥ ३९॥ दंष्ट्राकरा
लं दुष्प्रेक्ष्यं सूर्यकोटिसमप्रभं॥ निराकारकरुणाकारं भेषजं भवरोगिणां
॥ ४०॥ पिनाकिनं विशालाक्षं पशूनां पतिमीश्वरं॥ कालात्मानं कालका
लं देवदेवं महेश्वरं॥ ४१॥ ज्ञानवैराग्यसंपन्नं योगानंदकरं परं॥ शाश्वतै
श्वर्यसंपन्नं महायोगीश्वरेश्वरं॥ ४२॥ समस्तशक्तिसंयुक्तं पुण्यकायं दुरा
सदं॥ तारकं ब्रह्मसंपूर्णमणीयांसं महत्तमं॥ ४३॥ यतीनां परमं ब्रह्म
व्रतीनां तपसः फलं॥ संयमीहृत्समासीनं तपस्विजनसंस्तुतं॥ ४४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर

त्रि०स० चिधींद्रविष्णुनमितंमुनिसिध्यानिषेवितं ॥ महादेवंमहात्मानंदेवानामपिदेवतं ॥ ४५ ॥
॥ ४ ॥ शांतंपवित्रमोंकारंज्योतिषांज्योतिरुत्तमं ॥ शंकरोमेशिर:पातुललाटंभाललोच
न: ॥ ४६ ॥ विश्वचक्षुर्दृशौपातुभ्रुवोरुद्रोममावतु ॥ गंडौपातुमहेशान:श्रुतीर
क्षतुधूर्जटि: ॥ ४७ ॥ कपोलौमेमहादेव:पातुनासांसदाशिव: ॥ मुखंपातुहविर्भो
क्ताओष्ठौपातुमहेश्वर: ॥ ४८ ॥ दंतान्रक्षतुदेवेशस्तालुभूसोमकलाधर: ॥ र
सनांपरमानंद:पातुशारवोशिवाप्रिय: ॥ ४९ ॥ चिबुकंपातुमेशंभु: श्मश्रूनत्रातु
विनाशन: ॥ कूर्चंपातुभव:कंठंनीलकंठोवतुध्रुवं ॥ ५० ॥ स्कंधौस्कंदगुरु:पा
तुबाहूपातुमहाभुज: ॥ उपबाहूमहावीर्य:करौविबुधसत्तम: ॥ ५१ ॥ अंगु ॥ श्री: ॥
ली:पातुपंचास्य:पर्वाणिचसहस्रपात् ॥ हृदयंपातुसर्वात्मास्तनौपातु ॥ ८ ॥

पितामह: ॥ उरू ॥ उदरंहुतभुक्पातुमध्यंमेमध्यमेश्वर: ॥ कुक्षिंपातुभवानीश:पृष्ठंपा
तुकुलेश्वर: ॥ ५३ ॥ प्राणान्मेप्राणद:पातुनाभिंभीम:कटिंविभु: ॥ सक्थिनीपातुमेभर्गो
जानुनीजननाधिप: ॥ ५४ ॥ जंघेपुरारिपु:पातुचरणौभवनाशन: ॥ शरीरंपातु
मेशर्वोबाह्यमाभ्यंतरंशिव: ॥ ५५ ॥ इंद्रियाणिहर:पातुसर्वत्रजयवर्धन: ॥ पू
०५ वैममम्मड:पातुदक्षिणेयमसूदन: ॥ ५६ ॥ वारुण्यांसलिलाधीश:उदीच्यांमेम
हीधर: ॥ ईशान्यांपातुभूतेशआग्नेय्यांरविलो[illegible]चन: ॥ ५७ ॥ नैऋत्यांमेभू
तभृत्पातुवायव्यांबलवर्धन: ॥ ऊर्ध्वंपातुमखध्वंसीह्यध:संसारनाशन: ॥ ५८ ॥
सर्वत:सुखद:पातुबुध्निंपातुसुलोचन: ॥ एवंन्यासादिकंकृत्वासाक्षाच्छंभुम
योभवेत् ॥ ५९ ॥ नमोहिरण्यबाहवादिपठेन्मंत्रंतुभक्तित: ॥ सद्योजातादिभिर्म
त्रैर्नमस्कुर्यात्सदाशिवं ॥ ६० ॥ तत:सहस्रनामेदंपठितव्यंमुमुक्षुभि: ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शि०स० सर्वकार्यकरं पुण्यं महापातकनाशनं ॥ ६१ ॥ सर्वसुख्यतमं दिव्यं सर्वलोकहितप्र
दं ॥ मंत्राणां परमो मंत्रो भवदुःखषड्भिर्हृते ॥ ६२ ॥ ॐ नमः शंभवेन्चेतिषात्त्रिर्मंत्रे
॥५॥ षडंगकं ॥ न्यासं कृत्वा तु विधिवत्संम्ये ध्यानं ततश्चरेत् ॥ ६३ ॥ अस्य श्रीवेदसारा
ख्यपरमदिव्यसहस्रनाममाला मंत्रस्य श्रीभगवान्नारायणऋषिः अनुष्टुप्छंदः
श्रीपरमात्मामहादेवो देवता नमइतिबीजं शिवायेति शक्तिः चैतन्यमिति कील
कं श्रीमहादेवप्रीत्यर्थे जपे विनियोगः ॥ अथन्यासः ॥ श्रीभगवन्नारायणऋषये
नमः शिरसि ॥ अनुष्टुप्छंदसे नमः मु० ॥ श्रीआत्मामहादेवदेवतायै नमः हृ० ॥ पर३
नमइतिबीजाय नमः गुह्ये ॥ शिवायेतिशक्तये नमः पादयोः ॥ चैतन्यमिति की
लकाय नमः सर्वांगे ॥ ॐ नमः शंभवे च अंगुष्ठाभ्यां नमः ॥ ~~[struck]~~ श्रीः
॥५॥

ॐ नमो मयोभवे च तर्जनीभ्यां नमः ॥ ॐ नमः शंकराय च मध्यमाभ्यां नमः ॥ ॐ नमो मयस्क
राय च अनामिका० ॥ ॐ नमः शिवाय च कनिष्ठिका० ॥ ॐ नमः शिवतराय च करतल
करपृष्ठाभ्यां० ॥ ॐ नमः शंभवे च हृ० ॥ ॐ नमो मयोभवे च शि० ॥ ॐ नमः शंकराय
च शिखा० ॥ ॐ नमो मयस्कराय च क० ॥ ॐ नमः शिवाय च नेत्र० ॥ ॐ नमः शिवत
राय च अस्त्रा० ॥ अथ ध्यानं ॥ कैलासाद्रिनिभं त्रिशांकककलस्यास्फूर्जज्जटामंडलं ना
सालोकनतत्परं त्रिनयनं वीरासनाध्यासितं ॥ मुद्राटंककुरंगजानुविलसद्बाहुं प्र
सन्नाननं कक्षाबद्धभुजंगमं मुनिवृतं वंदे महेशं परं ॥ १ ॥ ध्यायेन्नित्यं महेशं र
जतगिरिनिभं चारुचंद्रावतंसं रत्नाकल्पोज्वलांगं परशुमृगवराभीतिहस्तं प्र
सन्नं ॥ पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववं
द्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रं ॥ २ ॥ एवं ध्यात्वा पंचोपचारैर्मानस पू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रि०स० जांकुर्यात्॥ ॥ ॥ॐ नमः परायदेवायत्र्यंबकायमहात्मने। कामिनेनीलकंठायनिर्मलायप
॥६॥ परेशिने ॥१॥ निर्विकल्पायशांतायनिरहंकारिणेनमः॥ निरंजनायशर्वायनिःसंगपरमात्मने
॥२॥ नमश्शिवायभर्गायपुराणीतायवेधसे॥ महादेवायपीनायपार्वतीपतयेनमः
॥३॥ कैवल्यायमहेशायविभूषायबुधात्मने॥ कैवल्यायसुरेशायनिस्पृहायस्वरूपिणे
॥४॥ नमःसोमविभूषायकालायामिततेजसे॥ अजरायजगस्पितेजनकायपिनाकि
ने॥५॥ निराधारायसिंहायमायातीतायतेनमः॥ बीजायसर्पभूषायपशूनांपतये
नमः॥६॥ पुरंदरायभद्रायपुरुषायमहीयसे॥ महासंतोषरूपायज्ञानिनेऽव्यवु
ध्ये॥७॥ नमोऽव्यक्तस्वरूपायतपसेपरमात्मने॥ पूर्वजायसुरेशायब्रह्मणेनंतमूर्त ॥श्रीः॥
ये॥८॥ निरक्षरायसूक्ष्मायकैलासपतयेनमः॥ निरामयायकांतायनिरातंकाय
तेनमः॥९॥ निरालंबायविश्वायनित्यायपतयेनमः॥ आत्मारामायभव्यायपूज्याय ॥६॥

त्रे २

परमेष्ठिने ॥१०॥ विकर्तनायसूर्यायत्र्यंबकेविश्वरूपिणे॥ तारायहंसनाथायप्रतिस्र
र्गपतेनमः॥११॥ परावरेशरुद्रायभयायालंघ्यरत्नकृये॥ इंद्रध्वंसनधीशायकालह
रेमनस्विने॥१२॥ विश्वाक्षितैजगत्धात्रेजगन्नेत्रेनमोनमः॥ जटिलायविरागायपवित्रा
यमृडायच॥१३॥ निरवद्यायपात्रायस्तेनानांपतयेनमः॥ भाद्रायरविनेत्रायव्योमके
शायतेनमः॥१४॥ चतुर्भोगायसाराययोगिनेनंतगामिने॥ धर्मिष्ठायवरिष्ठायपुरत्र
यविघातिने॥१५॥ गरिष्ठायगिरीशायपरस्थायनमोनमः॥ व्याघ्रचर्मांबरायाथदिग्वा
वस्त्रायतेनमः॥१६॥ परमप्रेममंत्रायप्रथमायसुचक्षुषे॥ आद्यायशूलहस्तायशितिकं ॥नि ४
ठायतेनमः॥१७॥ उग्रायवामदेवायश्रीकंठायनमोनमः॥ विश्वेश्वरायसूर्यायगौरी
रागवरायच॥१८॥ मृत्युंजयायवीरायवीरभद्रायतेनमः॥ कामनाशायगुरवेमुक्तिनाथा
यतेनमः॥१९॥ विरूपाक्षायसूतायवह्निनेत्रायतेनमः॥ जलंधरशिरश्छेत्रेहविषे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रि०स० हितकारिणे ॥ २० ॥ महाकालाय वेद्याय सुघोराय वैनमः ॥ नमॐकाररूपाय सोम
॥ ७ ॥ नाथाय तेनमः ॥ २१ ॥ रामेश्वराय शुचये भीमेश्वराय नमो नमः ॥ त्र्यंबकाय गिरीशाय केदारा
य नमो नमः ॥ २२ ॥ गंगाधराय कवये नागनाथाय ते नमः ॥ भस्मप्रियाय रुद्राय लक्ष्मी
रागाय नमो नमः ॥ २३ ॥ पूर्णाय भूतपतये सर्वज्ञाय दयालवे ॥ धर्माय धनदेशाय गजच
र्मांबराय च ॥ २४ ॥ भालनेत्राय यज्ञाय श्रीशैलपतये नमः ॥ कृत्यानुरेनसेनी लक्तोहि
ताय नमो नमः ॥ २५ ॥ अंधकासुरहंत्रे च पावनाय बलाय च ॥ चैतन्याय त्रिनेत्राय दक्ष
नाशकराय च ॥ २६ ॥ नमः सहस्रशिरसे जयरूपाय ते नमः ॥ सहस्रचरणायाथ यो
गिहृत्पद्मवासिने ॥ २७ ॥ सद्योजाताय वंद्याय सर्वदेवमयाय च ॥ आमोदाय प्रगल्भा ॥ श्री: ॥
य गायत्रीवल्लभाय च ॥ २८ ॥ व्योमाकाराय विप्राय नमो विप्रप्रियाय च ॥ अघो ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=09.08.19 14:32
,TRANSFERRED=2019/08/09 at 14:36:28
,PAGES=9
,TYPE=STD
,NAME=S0001429
,Book Name=M-133-SHIVSAHSRANAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection